# Haridvareshvaralingasthana Varnanam

# હરિદ્વારેશ્વરલિઙ્ગસ્થાનવર્ણનમ્

## Document Information

Text title : Haridvareshvaralingasthana Varnanam

File name : haridvAreshvaralingasthAnavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 29|| -

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

Haridvareshvaralingasthana Varnanam

# હરિદ્વારેશ્વરલિઙ્ગસ્થાનવર્ણનમ્

દેવી -

ત્વત્તઃ શ્રુતાનિ ક્ષેત્રાણિ પુણ્યાનિ પરમેશ્વર ।
લિઙ્ગાનિ દેવદેવેશ દર્શનાત્ પુણ્યદાનિ ચ ॥ ૧॥

સ્મરણાન્મુક્તિદાનીશ પૂજનાદ્ જ્ઞાનદાનિ ચ ।
અવિમુક્તસ્ય મહિમા ત્વયા નૈવોપવર્ણિતઃ ॥ ૨॥

કિં વા તત્કારણં શમ્ભો કિમન્યત્ ત્વત્પ્રિયઙ્કરમ્ ।
ક્ષેત્રમસ્તિ મહાદેવ વદ ગુહ્યમપિ પ્રભો ॥ ૩॥

ઇતિ દેવ્યા વચઃ શ્રુત્વા કરુણારસસાગરઃ ।
શઙ્કરઃ પ્રાહ તાં દેવીં શ્રૃણુધ્વં મુનિપુઙ્ગવાઃ ॥ ૪॥

ઈશ્વરઃ -

એષ દ્વાદશલિઙ્ગાનાં મહિમા જ્યોતિષાં શિવે ।
મયા તવાનુપૂર્વેણ સેતિહાસં ચ કૃત્સ્નશઃ ॥ ૫॥

અવિમુક્તસ્ય મહિમા વિશ્વેશસ્યાપિ વૈભવમ્ ।
કથયામ્યગ્રતો દેવિ સઙ્ગ્રહાદધુનોદિતઃ ॥ ૬॥

ત્રિયમ્બકસ્ય મહિમા તત્ર કિઞ્ચિન્મયોદિતઃ ।
અસ્મિન્નેવાગ્રતો દેવિ સપ્તમાંશે મહેશ્વરિ ॥ ૭॥

વૈભવં વિશ્વનાથસ્ય લિઙ્ગાનાં ચાનુપૂર્વશઃ ।
કાવેરી નામ દેવેશિ નદી પુણ્યા સરિદ્વરા ॥ ૮॥

યથા ભાગીરથી ગઙ્ગા વિન્ધ્યસ્યોત્તરવાહિની ।
તથૈવ સા મહાદેવિ વિન્ધ્યાદ્દક્ષિણમાસ્થિતા ॥ ૯॥

તત્રત્યદિવ્યલિઙ્ગાનાં ક્ષેત્રાણામપિ શઙ્કરિ ।
વૈભવં કથયામ્યગ્રે અસ્મિન્નંશે હિ સપ્તમે ॥ ૧૦॥

અધુનાં સમ્પ્રવક્ષ્યામિ હરિદ્વારસ્ય વૈભવમ્ ।
સાવધાનમનાઃ પુણ્યં શ્રૃણુ ભૂધરકન્યકે ॥ ૧૧॥

હરિદ્વારમિતિ ખ્યાતં તીર્થમીશાનતુષ્ટિદમ્ ।
ગઙ્ગાયમુનયોર્યત્ર પ્રભેદો દૃશ્યતેંઽબિકે ॥ ૧૨॥

તત્રાસ્તિ લિઙ્ગમુત્કૃષ્ટં હરિણા પૂજિતં પુરા ।
તત્રાસ્તિ વનમુન્મત્તગજેન્દ્રપરિસેવિતમ્ ॥ ૧૩॥

કરેણુભિઃ પરિવૃતં મૃગેન્દ્રૈરુપશોભિતમ્ ।
હિમવચ્છિખરં ચાન્યત્ કેદારાત્ પશ્ચિમે સ્થિતમ્ ॥ ૧૪॥

નાનાદ્રુમશતોપેતં તપસ્વિજનસેવિતમ્ ।
વૈખાનસૈર્વાલખિલ્યૈસ્તથા મુનિગણૈરપિ ॥ ૧૫॥

તપસઃ સિદ્ધિમિચ્છદ્ભિઃ તપઃસ્થાનમનુત્તમમ્ ।
રમ્યશાર્દૂલસંયુક્તઃ (?) સરિદ્ભિઃ સાગરોપમૈઃ ॥ ૧૬॥

નીલતાલીવનોપેતં વાતઝર્ઝરપત્રકમ્ ।
ગઙ્ગા પ્રભૂતા યત્રાસીત્તત્રાસ્તિ વિમલં સરઃ ॥ ૧૭॥

કલ્લોલમાલાકલિતં તમાલકદલીવૃતમ્ ।
મન્દારતરુભિઃ છન્નં મન્દમારુતવીજિતમ્ ॥ ૧૮॥

સહસ્રપત્રૈઃ કમલૈઃ શોભિતં સ્વચ્છવાલુકમ્ ।
તત્રાસ્તિ લિઙ્ગમીશાનિ હરિદ્વારેશ્વરાભિધમ્ ॥ ૧૯॥

તલ્લિઙ્ગમૂલતો દેવિ ગઙ્ગા યત્ર વિનિર્ગતા ।
દેવી -
કથં ગઙ્ગા મહાદેવ હરિદ્વારદ્વિનિર્ગતા ।
કિઞ્ચ તત્કરણં શમ્ભો વદ મહ્યં મહેશ્વર ॥ ૨૦॥

મહેશ્વરઃ -
શ્રૃણુ શૈલસુતે બાલે વિશાલનયનેઽમ્બિકે ।
વિષ્ણુઃ પુરા તપસ્તપ્યન્ મામારાધ્યાવસચ્છિવે ॥ ૨૧॥

ભસ્માભ્યક્તતનુર્દેવિ ત્રિપુણ્ડ્રાવલિભાસુરઃ ।
નીલિમાનનભભ્રાજચ્છારદાભ્રગણો યથા ॥ ૨૨॥

નીલતોયદમધ્યસ્થત્રિપુણ્ડ્રનડિદુદ્યતઃ ।

રુદ્રમાવર્તયંસ્તસ્થૌ મમ પઞ્ચાક્ષરાદરઃ ॥ ૨૩॥

હરિદ્વારેશ્વરં લિઙ્ગં બિલ્વૈરભ્યર્ચ્ય સંસ્થિતઃ ।
ત્વત્પિતુર્વારુણે દેવિ શિખરે રમયા તદા ॥ ૨૪॥

કાલં નિત્યે તપોરાશિઃ કાલકાલાર્ચનેન હિ ।
રમન્તં તં તપસ્યન્તં રુદ્રાક્ષવરધારિણમ્ ॥ ૨૫॥

રુદ્રવિન્યસ્તમનસં રુદ્રાધ્યાયજપાદરમ્ ।
ફલપુષ્પાણિ ચિન્વન્તી ભર્તુઃ પૂજાપ્રકલ્પને ॥ ૨૬॥

દીપદા શઙ્કરસ્યાગ્રે પાકકર્ત્રી શિવાય વૈ ।
નૈવેદ્યૈસ્તર્પયામાસ હરિદ્વારેશમીશ્વરમ્ ॥ ૨૭॥

ઉત્ફુલ્લકમલૈરીશં કમલાપિ સમાર્ચયત્ ।
હરિદ્વારેશ્વરં લિઙ્ગં બિલ્વપત્રૈશ્ચ કોમલૈઃ ॥ ૨૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે હરિદ્વારેશ્વરલિઙ્ગસ્થાનવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૯॥ -

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 29.. -

Notes:

Shiva introduces to Devi the Vishveshwara (Vishwanatha) Jyotirlinga that would be detailed in Amsa-07; and proceeds to brief Her about Haridwareshwara Linga near River Ganga, where Shri Vishnu worshipped Shiva in order to get relief from the sin of killing an asura because he was also a Shiva devotee.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

---

*Haridvareshvaralingasthana Varnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*